श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकोनसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनसप्ततितमः सर्गः ॥

## शत्रुघ्नलवणयोर्युद्धं लवणस्य वधश्च

तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः।
क्रोधमाहारयत् तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्॥ **7.69.1** ॥

पाणी पाणिं च निष्पिष्य दन्तान् कटकटाय्य च।
लवणो रघुशार्दूलमाह्वयामास चासकृत्॥ **7.69.2** ॥

तं ब्रुवाणं तथा वाक्यं लवणं घोरदर्शनम्।
शत्रुघ्नो देवशत्रुघ्न इदं वचनमब्रवीत्॥ **7.69.3** ॥

शत्रुघ्नो न तदा जातो यदान्ये निर्जितास्त्वया।
तदद्य बाणाभिहतो व्रज त्वं यमसादनम्॥ **7.69.4** ॥

ऋषयोऽप्यद्य पापात्मन् मया त्वां निहतं रणे।
पश्यन्तु विप्रा विद्वांसस्त्रिदशा इव रावणम्॥ **7.69.5** ॥

त्वयि मद्बाणनिर्दग्धे पतितेऽद्य निशाचर।
पुरे जनपदे चापि क्षेममेव भविष्यति॥ **7.69.6** ॥

अद्य मद्बाहुनिष्क्रान्तः शरो वज्रनिभाननः।
प्रवेक्ष्यते ते हृदयं पद्ममंशुरिवार्कजः॥ **7.69.7** ॥

एवमुक्तो महावृक्षं लवणः क्रोधमूर्छितः।
शत्रुघ्नोरसि चिक्षेप स च तं शतधाच्छिनत्॥ **7.69.8** ॥

तद् दृष्ट्वा विफलं कर्म राक्षसः पुनरेव तु।
पादपान् सुबहून् गृह्य शत्रुघ्नायासृजद् बली॥ **7.69.9** ॥

शत्रुघ्नश्चापि तेजस्वी वृक्षानापततो बहून्।
त्रिभिश्चतुर्भिरेकैकं चिच्छेद नतपर्वभिः॥ **7.69.10** ॥

ततो बाणमयं वर्षं व्यसृजद् राक्षसोपरि।
शत्रुघ्नो वीर्यसम्पन्नो विव्यथे न स राक्षसः॥ **7.69.11** ॥

ततः प्रहस्य लवणो वृक्षमुद्यम्य वीर्यवान्।
शिरस्यभ्यहनच्छूरं स्रस्ताङ्गः स मुमोह वै॥ **7.69.12** ॥

तस्मिन् निपतिते वीरे हाहाकारो महानभूत्।
ऋषीणां देवसङ्घानां गन्धर्वाप्सरसां तथा॥ **7.69.13** ॥

तमवज्ञाय तु हतं शत्रुघ्नं भुवि पातितम्।
रक्षो लब्धान्तरमपि न विवेश स्वमालयम्॥ **7.69.14** ॥

नापि शूलं प्रजग्राह तं दृष्ट्वा भुवि पातितम्।
ततो हत इति ज्ञात्वा तान् भक्षान् समुदावहत्॥ **7.69.15** ॥

मुहूर्ताल्लब्धसंज्ञस्तु पुनस्तस्थौ धृतायुधः।
शत्रुघ्नो वै पुरद्वारि ऋषिभिः सम्प्रपूजितः॥ **7.69.16** ॥

ततो दिव्यममोघं तं जग्राह शरमुत्तमम्।
ज्वलन्तं तेजसा घोरं पूरयन्तं दिशो दश॥ **7.69.17** ॥

वज्राननं वज्रवेगं मेरुमन्दरसन्निभम्।
नतं पर्वसु सर्वेषु संयुगेष्वपराजितम्॥ **7.69.18** ॥

असृक्चन्दनदिग्धाङ्गं चारुपत्रं पतत्रिणम्।
दानवेन्द्राचलेन्द्राणामसुराणां च दारुणम्॥ **7.69.19** ॥

तं दीप्तमिव कालाग्निं युगान्ते समुपस्थिते।
दृष्ट्वा सर्वाणि भूतानि परित्रासमुपागमन्॥ **7.69.20** ॥

सदेवासुरगन्धर्वं मुनिभिः साप्सरोगणम्।
जगद्धि सर्वमस्वस्थं पितामहमुपस्थितम्॥ **7.69.21** ॥

उवाच देवदेवेशं वरदं प्रपितामहम्।
देवानां भयसम्मोहो लोकानां सङ्क्षयं प्रति॥ **7.69.22** ॥

कच्चिल्लोकक्षयो देव सम्प्राप्तो वा युगक्षयः।
नेदृशं दृष्टपूर्वं च न श्रुतं प्रपितामह॥ **7.69.23** ॥

तेषां तद् वचनं श्रुत्वा ब्रह्मा लोकपितामहः।
भयकारणमाचष्ट लोकानामभयङ्करः॥ **7.69.24** ॥

उवाच मधुरां वाणीं शृणुध्वं सर्वदेवताः।
वधाय लवणस्याजौ शरः शत्रुघ्नधारितः॥ **7.69.25** ॥

तेजसा तस्य सम्मूढाः सर्वे स्मः सुरसत्तमाः।
एष पूर्वस्य देवस्य लोककर्तुः सनातनः॥ **7.69.26** ॥

शरस्तेजोमयो वत्सा येन वै भयमागतम्।
एष वै कैटभस्यार्थे मधुनश्च महाशरः॥ **7.69.27** ॥

सृष्टो महात्मना तेन वधार्थे दैत्ययोस्तयोः।
एक एव प्रजानाति विष्णुस्तेजोमयं शरम्॥ **7.69.28** ॥

एषा एव तनुः पूर्वा विष्णोस्तस्य महात्मनः।
इतो गच्छत पश्यध्वं वध्यमानं महात्मना॥ **7.69.29** ॥

रामानुजेन वीरेण लवणं राक्षसोत्तमम्।
तस्य ते देवदेवस्य निशम्य वचनं सुराः ॥ **7.69.30** ॥

आजग्मुर्यत्र युध्येते शत्रुघ्नलवणावुभौ।
तं शरं दिव्यसङ्काशं शत्रुघ्नकरधारितम् ॥ **7.69.31** ॥

ददृशुः सर्वभूतानि युगान्ताग्निमिवोत्थितम्।
आकाशमावृतं दृष्ट्वा देवैर्हि रघुनन्दनः ॥ **7.69.32** ॥

सिंहनादं भृशं कृत्वा ददर्श लवणं पुनः।
आहूतश्च पुनस्तेन शत्रुघ्नेन महात्मना ॥ **7.69.33** ॥

लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः।
आकर्णात् स विकृष्याथ तद् धनुर्धन्विनां वरः ॥ **7.69.34** ॥

स मुमोच महाबाणं लवणस्य महोरसि।
उरस्तस्य विदार्याशु प्रविवेश रसातलम् ॥ **7.69.35** ॥

गत्वा रसातलं दिव्यः शरो विबुधपूजितः।
पुनरेवागमत् तूर्णमिक्ष्वाकुकुलनन्दनम् ॥ **7.69.36** ॥

शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः।
पपात सहसा भूमौ वज्राहत इवाचलः ॥ **7.69.37** ॥

तच्च शूलं महद् दिव्यं हते लवणराक्षसे।
पश्यतां सर्वदेवानां रुद्रस्य वशमन्वगात् ॥ **7.69.38** ॥

एकेषुपातेन भयं निपात्य
लोकत्रयस्यास्य रघुप्रवीरः।
विनिर्बभावुत्तमचापबाण -
स्तमः प्रणुद्येव सहस्ररश्मिः ॥ **7.69.39** ॥

**ततो हि देवा ऋषिपन्नगाश्च**
**प्रपूजिरे ह्यप्सरसश्च सर्वाः।**
**दिष्ट्या जयो दाशरथेरवाप्त -**
**स्त्यक्त्वा भयं सर्प इव प्रशान्तः॥ 7.69.40 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनसप्ततितमः सर्गः॥